

# COVID -19 (कोरोनाविषाणुः)

# स्वास्थ्यरक्षा-जागरुकताभियानम्


संस्कृति-संस्कृत-संस्कार-शिक्षासमितिः

SANSKRITI SANSKRIT SANSKAR SHIKSHA SAMITI

ग्रामः - बरौदी, पत्रालयः - सनौरा, जिला - दतिया (मध्यप्रदेशः), भारतम्, 475686.

Vill- Baraudi, P.O.- Sanaura, Distt- Datia (Madhya Pradesh) Bharat - 475686.

Email:- sanskritsamiti17@gmail.com, Website:- www.sanskritsamiti.org



# COVID – 19 किम् ?

- ‘कोविड-19’ एकः सङ्क्रामकरोगः विद्यते यत् सद्य एव अन्वेषितस्य नूतनविषाणोः “नोवल-कोरोना-वायरस”कारणेन जगति प्रसरति।



# अस्य रोगस्य प्रसारकारणानि -

- कोरोनारोगेन पीड़ितस्य छिक्का-कासकारणात् च तस्य लारबिन्दवः वायुमाध्यमेन भूमौ परितः वा अत्र-तत्र प्रस्तरे पतन्ति।

- यदि कश्चिच् अन्यः व्यक्तिः तस्मिन् समये रोगिणः समीपे स्थितः तं प्रस्तरं स्पृशति यत्र तस्य लारबिन्दवः पतिताः पुनश्च स्वहस्ताभ्यां स्वमुखं नेत्रे आननं वा स्पृशति तर्हि सोऽपि सङ्क्रमितो भवितुं शक्नोति।

- यदि कश्चिच् अन्यः व्यक्तिः रोगिणः सकाशात् न्यूनातिन्यूनं त्रिहस्तमितप्रमाणात्मके (एक-मीटर) दूरे नैव तिष्ठति तर्हि सङ्क्रमणप्रसारस्य सम्भावना अधिका भवति।



# कोरोनारोगपीडितस्य का गतिर्भवति -

- अध्यधिकपीडितेभ्यः (80%) उपचारस्य आवश्यकता नैव भवति, ते स्वयमेव स्वस्थाः भवन्ति।
- कतिपयपीडितेभ्यः (20%) चिकित्सालयं गत्वा उपचारग्रहणस्य आवश्यकता भवति। उपचारेण तेऽपि स्वस्थाः भवन्ति।
- अत्यल्पपीडितेभ्यः गहनचिकित्सायां (आइ-सी-यू) उपचारस्य आवश्यकता भवति।



## कोरोनारोगस्य सामान्यलक्षणानि कानि -

- ज्वरः, कण्ठे रोधः, कासः, श्वसने च अवरोधः ।
- अन्यानि सामान्यसङ्क्रमणसदृशानि लक्षणानि, यथा - सामान्यशीतः, पीनसः(इन्फ्लूएंजा) सदृशान्येव लक्षणानि।

# कोरोनारोगनिरोधोपायाः -

- नियमतरूपेण अल्कोहलद्रव्येन (सेनिटाइजर) अथवा फेनकेन (साबुन) सम्यक् हस्तप्रक्षालनं कर्तव्यम् ।
- बहिस्थात् आगमनात्परं अथवा कोरोनासङ्क्रमितस्य सम्पर्कात् अनन्तरं तथैव सम्यक् हस्तप्रक्षालनं कर्तव्यम्।
- यदि कश्चन छिक्कति कासते च तर्हि स्वयमेव नयूनातिन्यूनं त्रिहस्तं यावत् (1मीटर) दूरं भवतु।
- हस्तप्रक्षालनं बिना नेत्र, नासिका, मुखस्य च स्पर्शः नैव कर्तव्यः ।
- सुनिश्चतं करोतु यत् भवत्प्रतिवेशिनः सम्यक् श्वसनानुशासनं पालयेयुः। अर्थात् कासावसरे छिक्कावसरे वा मुखं सम्यक् आच्छादयेत् ।
- यदि भवान् अस्वथमनुभवति तर्हि गृहे एकान्तवासं करोतु। यदि ज्वर-कास-श्वासावरोधो वा विद्यते तर्हि यथाविधिः चिकित्सां कारयतु।


सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग्भवेत् ।।
।। धन्यवादः ।।